(पर्यावरण प्रदूषण समस्यायाः वैदिकं समाधानम्)

अंक: ०१ वर्षम् ०१, दिसम्बर २०१३ ISSN: 2347-9892

# शोध-प्रज्ञा

(अर्द्धवार्षिक-शोध-पत्रिका)


| | |
|---|---|
| **प्रधान-सम्पादक:** | **सम्पादक-मण्डलम्** |
| **प्रो. महावीर अग्रवाल:** | डॉ. सुशील उपाध्याय: |
| **कुलपति:** | डॉ. मनोज किशोर पंत: |
| | डॉ. दामोदर परगांई: |
| **प्रबन्ध-सम्पादक:** | डॉ. राकेश कुमार सिंह: |
| प्रो. मोहन चन्द्र बलोदी | डॉ. रत्नलाल: |
| | डॉ. रामरतन खण्डेलवाल: |
| **शोध मूल्यांकनकर्ता विद्वान्** | डॉ. लक्ष्मीनारायण जोशी |
| डॉ. विनोद चन्द्र विद्यालंकार: | डॉ. अरविन्द नारायण मिश्र: |
| | डॉ. प्रकाश चन्द्र पन्त: |
| **वित्त-व्यवस्थापक:** | डॉ. बिन्दुमती द्विवेदी |
| हरसिंह बोनाल: | डॉ. ज्ञानेन्द्र गौतम: |


वयं देवानां सुमतौ स्याम

**उत्तराखण्ड-संस्कृत-विश्वविद्यालयः**

**हरिद्वारम् (उत्तराखण्डम्)**

# पर्यावरण प्रदूषण-समस्यायाः-वैदिकं समाधानम्

**डॉ. बृहस्पति मिश्र**
प्राध्यापक, संस्कृत कॉलेज नयनादेवी जी
विलासपुर, हिमाञ्चल प्रदेश

मानव-मस्तिष्केन सृष्टेः सूक्ष्मभागेषु दृष्टिपातं कुर्वता भौतिक-तत्त्वानां तेषां क्रियाकलापानां प्रतिक्रियाकलापानां च सूक्ष्मेक्षिकया विचारः कृतः। मानव-चिन्तनस्य द्वे प्रमुखे धारे दृष्टिगते भवतः-भौतिकम्, आध्यात्मिकञ्च। अथ च इदं इत्थमपि सहजतया वक्तुं शक्नुमः तयोः चिन्तनधारयोः एका मूर्तानुगामिनी अपरा च अमूर्तानुगामिनी। यच्च प्रथमा तावत् तत्र सृष्टेः पञ्चभौतिक-तत्त्वानां जिज्ञासां निस्संदेहमेव ते स्व स्व रासायनिक-प्रक्रियाभिः सम्मिश्रण-विधाभिः उपादानकारणैः च स्थितत्वं स्थापयन्ति। भौतिकपक्षस्य कतमत् अपि एकं पक्षं संगृह्य तं वैज्ञानिकरीत्या पूर्णतया अनुशीलयितुं शक्नुमः। पञ्चभौतिकतत्वानां नियमितनिसर्गसिद्धक्रियाकलापाः भवन्ति तत्र च निसर्ग- विरुद्ध आचरेणन क्रियासु अवरोधाः उत्पद्यन्ते। एते अवरोधा एव दूषकतत्त्वरूपेषु तत्तत्पञ्चभौतिक- पदार्थान् तेषाञ्च रासायनिकक्रियाः, तेभ्यः सम्मिश्रण-घटित-प्रतिफलान् तेषाञ्च उपादानरूपात् विकृतीः कुर्वन्ति, यतोहि उपादानकारणानि यस्यां कस्यमपिस्थित्यां मूलरूपेण अवश्यमेव अस्तित्वं स्थापयन्ति नूनं न तेषां उपादानकारणानाम् मूलरूपं समाप्तं भवति अपितु विकृतिम् आपद्यन्ते। सांख्य नाशः कारणलयः ऐनां विकृतिमेव प्रदूषणसंज्ञया व्यवहरन्ति जनाः। कस्यापि निसर्गसिद्धसंतुलितपदार्थस्य अन्तर्भूत तत्त्वस्य च अतिमात्रया, अल्पमात्रया, विषममात्रया च सेवनं प्रदूषणस्य मौलिकं कारणम्। पञ्चभौतिकवर्गीकरण-आधारेण प्रदूषणं पञ्चविधं-आकाशीयं प्रदूषणम्, आग्नेयं प्रदूषणम्, वायवीयं प्रदूषणम्, जलीयं प्रदूषणम्, पार्थिवं प्रदूषणम् च।

**आकाशीयं प्रदूषणम्**

शब्दस्य ध्वनेः वा अतिमात्रेण प्रयोगाः प्रदूषणक्षेत्र-भाक् भवन्ति। विशालकाययन्त्राणि, जलीय स्थलीय वायवीय वाहनानि। दूरदर्शनं, आकाशवाणी, ध्वनिविस्तारकयन्त्रं, विविध वाद्यानि च शब्दस्य प्रदूषणकारकाः परमाणुविस्फोटविसर्जितरेडियोधर्मिकिरणैस्तु अकल्पनीयम् प्रदूषणं भवति। शब्दगुणं आकाशम् इति दृष्ट्या इदम् आकाशीयप्रदूषणं भवति।

**आग्नेयं प्रदूषणम्**

हानिकारकतत्त्वानां दहनक्रियया निर्गतवातयः सूर्यस्य च स्वरूपस्य पराबैंगनीघातककिरणाः प्रदूषणजनकाः। सूर्यस्य हानिकारकरश्मीन् अपाकर्तुं प्राकृतिकतया ओजोनतत्वेन निर्मितम् आवरणम् अस्ति। तस्मिश्च क्लोरोफ्लोरो इति आदिभिः तत्त्वैः छिद्रकारणात् सूर्यस्य घातका रश्मयः पृथ्वीम् आविशन्ति।

**वायवीयं प्रदूषणम्**

विभिन्नपर्थिवपदार्थज्वालनेन प्राणवायुः नष्टः भवति। पेट्रोलियमपदार्थदहनेन द्विविधा हानिः। प्राणवायुः तु नश्यति अपरञ्च तद्निर्गतघातकवातयः स्वास्थ्यं विनाशयन्ति। विद्युत् तापगृहेभ्योऽपि हानिप्रदाः वातयः निर्गच्छन्ति। मोटरयान, लौहगयानइत्यादिभिः वाहनैः अहर्निशं वायवीयप्रदूषणस्य संवर्धनं भवति। नाभिकीयविकिरणाः अपि प्रदूषणसहायकाः जायन्ते।

Nikaṣa, Vol.-1, Issue-3, 2012 ISSN: 2277-6826

# प्राचीना शिक्षापद्धतिः

बृहस्पतिमिश्रः*

mishrabrihaspati@gmail.com

## *सारः*

*यथा पशुषु क्रियात्मकज्ञानानि जन्मना एव स्वभावतः भवन्ति तथा मनुष्ये न भवति । सः तु कालान्तरेण सर्वं अभ्यस्यति । परं च अत्र अपरः अपि भेदः वर्तते पशुमनुष्ययोर्मध्ये यत् सः मनुष्यः यत् कालान्तरेण निमित्तान्याधारीकृत्य अभ्यस्यति तत्र सीमा न भवति । यावदपि इच्छति सः तावत् अभ्यस्तुं शक्नोति । अर्थात् मनुष्यं यावदपि वयं शिक्षयामः तावत् सः गृहीतुं समर्थः भवति । इमं विषयम् अधिगत्य अस्माकम् ऋषयः तत्सम्बद्धग्रन्थान् बहून् रचयामासुः । तत्र ते एतादृशीं शिक्षां केन प्रकारेण दातुं शक्नुवन्ति इत्यस्मिन् विपये अवगमयितुमेव ऋषयः वेदम् आधारीकृत्य शिक्षाग्रन्थान् रचितवन्तः । इत्थं शिक्षापद्धत्याः सारभूतं तथ्यमेव अत्र सङ्क्षिप्तरूपेण उपस्थापितमस्ति॥*

अस्यां स्थावरजङ्गमात्मिकायां सृष्टौ जङ्गमेषु, मनुष्येषु, मनुष्येतरेषु बहुषु भेदेषु सत्सु अपि एकः महान् भेदः अस्ति यः अन्यान् सर्वान् भेदान् अतिशेते। सः अस्ति मनुष्ये नैसर्गिकरूपेण स्वभाविकज्ञानं न्यूनतमं भवति किन्तु मनुष्येतरेषु स्वाभाविकज्ञानम् एव अधिकं भवति। यथा यः जीवः यस्यां जात्याम् उत्पन्नो भवति तादृशानि ज्ञानानि स स्वभावत एव जानाति। यथा वानरस्य वृक्षारोहणं कूर्दनञ्च, मूषकस्य किमपि वस्तोः कर्त्तनज्ञानम्, मार्ज्जारस्य आखेटनम्, पक्षिणः नीडनिर्माणम् इत्यादि। यदा जीवः मनुष्यजात्यां शरीरं प्राप्नोति तदा स्वाभाविकज्ञानस्य अभाव एव भवति एकं स्तनपानं परित्यज्य। अन्यद् सर्वं ज्ञानं सः दृष्ट्वा अनुभूय च प्राप्नोति। मनोवैज्ञानिकैः एतादृशाः प्रयोगाः कृताः, प्रसङ्गा अपि प्राप्यन्ते यत् कदाचित् कमपि शिशुम् एकदा वृकाः नीतवन्तः ते तस्य मारणं न कृतवन्तः अपितु पालितवन्तः केषाञ्चन वर्षाणाम् अनन्तरं मनुष्यैः स शिशुः दृष्टः आनीतश्च, तदा सः शिशुः केवलं वृक इव शब्दायते स्म। एतां कथां कदाचित् सत्यरूपेण नापि मन्यामहे किन्तु एतावत्तु सत्यमेव अनुभूयते यत् शिशुः यादृशि वातावरणे तिष्ठति तादृशं ज्ञानमेव अधिगच्छति। एषा एव प्रकृतिः मनुष्यस्य यत् स्वाभाविकज्ञानं न्यूनतरं भवति किन्तु नैमित्तिकज्ञानम् अधिगन्तुं काचित् परासीमा नास्ति। अर्थात् मनुष्यं यदि उत्तमेन प्रकारेण यावत् अपि शिक्षयाम सर्वमपि सः गृहीतुं शक्नोति, अस्मिन् विषये सर्वेऽपि

---

* प्राध्यापकः, श्रीशक्ति-संस्कृत-महाविद्यालयः, नैनादेवी, बिलासपुरम्, हिमाचलम्